संस्कृत

४४८/९०

वेदांत-

क्र.नं-३४

2467

# गुरुगीता

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratisthan, Mumbai."

(1)

॥ अथ गुरुगीता प्रारंभः ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)





॥श्रीगणेशायनमः ॥श्रीसरस्वत्यैनमः ॥श्रीगुरुभ्योनमः ॥ॐ अस्यश्रीगुरु
गीतास्तोत्रमंत्रस्य सदाशिवऋषिः ॥ नानाविधान छंदांसि श्रीगुरुपरमात्मा देवता
हं बीजं ॥सोशक्तिः ॥ क्रौंकीलकं ॥ श्रीगुरुप्रसादसिध्यर्थेजपेविनियोगः ॥अ
थंन्यासः ॥ॐ हंसांसूर्यात्मने अंगुष्टाभ्यांनमः ॥ॐ हंसींसोमात्मनेतर्जनी
भ्यानमः ॥ॐ हंसूंनिरंजनात्मने मध्यमाभ्यानमः ॥ॐ हंसैं निरामयात्मने
अनामिकाभ्यानमः ॥ॐ हंसौंअतनुसूक्ष्मात्मने कनिष्ठिकाभ्यांनमः ॥ॐ
हंसः अव्यक्तात्मनेकरतलकरपृष्टाभ्यानमः ॥ एवं हृदयादि ॥ॐ हंसांसू
र्यात्मने हृदयायनमः ॥ॐ हंसींसोमात्मने शिरसे स्वहा ॥ॐ हंसूं निरंजना
त्मने शिखायैवौषट् ॥ॐ हंसैं निराभासात्मनेकवचायहुं ॥ॐ हंसौंअत



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

नुसूक्ष्मात्मने नेत्रत्रयाय वौषट् ॥ ॐ हंसः अव्यक्तात्मने अस्त्राय फट् ॥ अथ
ध्यानं ॥ विश्वव्यापिनमामि देवममलं नित्यं परं निष्कलं ॥ नित्योद्बोध सहस्र
पत्रकमलं रव्याक्षरैर्मंडपं ॥ नित्यानंदमयं सुखैक निलयं नित्यं शिवं सुप्रभं ॥
ध्यायेहं परमं परात्परतरं स्वच्छंदतः सर्वगं ॥ १ ॥ हंसाभ्यां परिवृत्त पत्रकमलं दि
व्यं जगत्कारिणं ॥ विश्वोत्कीर्णमान्यलोक निलयं स्वच्छंद सानंददं ॥ अद्वैते
कमरखंड निद्धुनरसं पूर्णं ह्यनंता शुभं ॥ प्रत्यक्षाक्षर विग्रहं गुरुपदं ध्यायं वि
भुं शांतये ॥ २ ॥ ऊर्ध्वान्मायगुरुपदेश भुवनं ॐकार सिंहासनं ॥ सिद्धाचा
रसमस्त वेदमथनं षट्चक्रसंभेदनं ॥ पश्चाद्देव स्फुलिंगज्योतिमनिर्मलं पूर्णप्र
भा भास्वरं ॥ तस्मै श्रीगुरुपादुका भजमनश्चैतन्यचंद्रोदयं ॥ ३ ॥ संतोषं च
गुरुं वंदे परसं वित्तिदायकं ॥ शांति सिंहासनारूढं आनंदामृत भोगदं ॥ ४ ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3)

॥गुरु॥ ॥गीता॥

हृदयकमलमध्येदीपवद्वेदसारं ॥ प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यं ॥
५॥ हरिगुरुशिवयोगेसर्वभूतस्थमेकं ॥ सकृदपिमनसोवैध्यायतेयःस
॥२॥ मुक्तः ॥ ६ ॥ इतिध्यात्वा ॥ मानसोपचारैःसंपूज्य ॥ जपंकुर्यात ॥ सूतोवा
च ॥ कैलासशिखरेरम्ये भक्तिसाधनतत्परं ॥ प्रणम्यपार्वतीभक्त्याशंक
रंपरिपृच्छति ॥ १ ॥ पार्वत्युवाच ॥ ॐनमोदेवदेवेशपरात्परजगद्गुरो ॥
सदाशिवमहादेव गुरुदीक्षांप्रदेहिमे ॥ २ ॥ केनमार्गेणभोस्वामिन् देहीब्र
ह्ममयोभवेत् ॥ तत्कृपांकुरुमेस्वामिन् नमामिचरणंतव ॥ ३ ॥ ईश्वरउ० ॥
ममरूपाधिदेवित्वं त्वत्प्रीत्यर्थंवदाम्यहं ॥ लोकोपकारकंदेवि नकेनापि
कृतंपुरा ॥ ४ ॥ दुर्लभंत्रिषुलोकेषु तच्छृणुष्ववदाम्यहं ॥ गुरुर्ब्रह्मविना
नान्यत्सत्यंसत्यंनसंशयः ॥ ५ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ ॥२॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A) तस्यैतेकथिताह्यर्थाः प्रकाशंते महात्मनः ॥ ६ ॥ गुकारंस्त्वंधकारस्य रुका
रस्तेजउच्यते ॥ अंधकारविनाशित्वा गुरुरित्यभिधीयते ॥ ७ ॥ यदंघ्रिक
मलद्वंद्वहृत्तापनिवारणं ॥ तारकं भवसिंधोश्च गुरुब्रम्हनमाम्यहं ॥ ८ ॥
वेदशास्त्रपुराणानि इतिहासादिकानिच ॥ मंत्रयंत्रादिविद्यानांस्मृतिरु
च्चाटनादिकं ॥ ९ ॥ शैवशाक्त्यागमादीनि अन्येच बहुयन्मतं ॥ अपभ्रंश
समस्तानि जीवानां जीवानां भ्रांतिचेतसां ॥ १० ॥ यज्ञव्रततपोदानं जप
तीर्थस्तथैवच ॥ गुरुतत्वमविज्ञाय मूढास्तेचरतेजनाः ॥ ११ ॥ गुरुर्बु
ध्यात्मनोनान्यत्सत्यंसत्यंवरानने ॥ तल्लाभार्थप्रयत्नेन कर्तव्यंच
गृ मनीषिभिः ॥ १२ ॥ मूढविद्याजगन्माया देहमज्ञानसंज्ञितं ॥ उदयस्व
प्रकाशेन गुरुशब्देनकथ्यते ॥ १३ ॥ देहिब्रम्हभवेयस्मात्वत्कृप

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

॥गु०॥ र्थं वदाम्यहं ॥ सर्वपापविशुद्धात्मा श्रीगुरोः पादसेवनात् ॥१४॥ सर्वती गीता
॥३॥ र्थावगाहस्य संप्राप्नोति फलं नरः ॥ गुरुपादोदकं पीत्वा शेषं शिरसि धार
येत् ॥१५॥ शोषणं पापपंकस्य दीपनं ज्ञानतेजसां ॥ गुरुपादोदकं सम्य
क् संसारार्णवतारणं ॥१६॥ अज्ञानमूलहरणं जन्मकर्मनिवारणं ॥ ज्ञा
नवैराग्यसिध्यर्थं गुरुपादोदकं पिबेत् ॥१७॥ गुरुपादोदकं पीत्वा गुरुरु
च्छिष्टभोजनं ॥ गुरुमूर्तिं सदाध्यानं गुरुस्तोत्रं सदा जपेत् ॥१८॥ का
शी क्षेत्रनिवासश्च जान्हवी चरणोदकं ॥ गुरुर्विश्वेश्वरः साक्षात्तारकं
ब्रम्हनिश्चितं ॥१९॥ शिरःपादांकितं दृष्ट्वा गयास्तेचाक्षईवट ॥ तीर्थ ॥३॥
राजप्रयागोसौ गुरुमूर्त्यै नमोनमः ॥२०॥ गुरुमूर्तिं स्मरेन्नित्यं गु

Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

रुनामसदाजपेत् ॥ गुरोराज्ञांप्रकुर्वितं गुरोरन्यनभावयेत् ॥ २१ ॥
गुरुवक्त्रस्थितंब्रम्ह प्राप्यतेतत्प्रसादतः ॥ गुरुमूर्तिःसदाध्यानं यथा
स्वैरिणियोषितं ॥ २२ ॥ स्वाश्रमंचस्वयातिश्चस्वकीर्तिःपुष्टिवर्धनं
॥ अन्यत्सर्वंपरित्यज्य गुरुरन्यंनभावयेत् ॥ २३ ॥ अनंन्याश्चिंत
यंतोमां सुलभंपरमंसुखं ॥ तस्मात्सर्वप्रयत्नेन गुरोश्चाराधनं
कुरु ॥ २४ ॥ गुरुवक्त्रःस्थिताविद्या गुरुभक्त्याचलभ्यते ॥ त्रैलो
क्यस्फुटवक्तारो देवाद्याःसुरपन्नगाः ॥ २५ ॥ गुकारस्त्वंधकारस्याद्रु
कारस्तेजउच्यते ॥ अज्ञानग्रासकंब्रह्म गुरुरेवनसंशयः ॥ २६ ॥ गुका
रप्रथमावर्णा मायात्रिगुणभासकं ॥ रुकारंद्वितीयंब्रम्हमायाविभ्रां

" Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5)

॥ गुरु ॥ त्तिमोचकं ॥ २७ ॥ एवं गुरुपदं श्रेष्ठं देवानामपिदुर्लभं ॥ हाहाहूहू गणैश्चैव गं गीता:
॥ ४ ॥ धर्वाद्यैश्चपूजितः ॥ ध्रुवं तेषां च सर्वेषां नास्तितत्वं गुरोः परं ॥ २८ ॥ गुरोः श्चा
राधनं कार्यं जीवित्वं वै निवेदयेत् ॥ २९ ॥ आसनं शयनं वस्त्रं वाहनं भूषणादिकं
॥ साधकेन प्रदातव्यं गुरुसंतोषकारकं ॥ ३० ॥ गुरोराराधनं कार्यं जीवित्वं वै नि
वेदयेत् ॥ कर्मणा मनसा वाचा पट्टीभराराधयेद्गुरुं ॥ ३१ ॥ दीर्घदंडनमस्कृत्यं
निर्लज्ज्यो गुरुसन्निधौ ॥ शरीरमर्थसंप्राप्तिः सद्गुरुभ्यो निवेदयेत् ॥ ३२ ॥
कृमिकीटकभस्मादि विष्ठादुर्गंधि मूत्रकं ॥ श्लेष्मचर्मतथा रक्तं न वंचेत्त
द्वरानने ॥ ३३ ॥ संसारवृक्षमारूढं पतंति नरकार्णवे ॥ येनोधृतमिदं विश्वं
तस्मै श्री गुरुवेनमः ॥ ३४ ॥ अखंडमंडलाकारं व्याप्तयेन चराचरं ॥ तत्पदं ॥ ४ ॥
दर्शितं येन ॥ तस्मै श्री गुरवेनमः ॥ ३५ ॥ गुरुर्ब्रम्हा गुरुर्विष्णु गुरुर्देवो महे

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(5A)

॥ गुरु ॥

श्वरः ॥ गुरुरेव परब्रम्ह तस्मै श्री० ॥ ३६ ॥ अज्ञानतिमिरांधस्य ज्ञानांजन शला
कया ॥ चु[illegible]क्षुरुन्मिलितं येन तस्मै श्री० ॥ ३७ ॥ सर्वश्रुतिः शिरोरत्न विराजि
तपद्दांबुजं ॥ वेदांत गर्भसूर्याय तस्मै श्री गु० ॥ ३८ ॥ यस्य स्मरणमात्रेण ज्ञान
मुत्पद्यते स्वयं स एव सर्वसंपत्तिस्तस्मै श्री गु० ॥ ३९ ॥ चैतन्यं शाश्वतं शांतं व्यो
मातीतं निरंजनं ॥ नादबिंदुकलातीतं तस्मै श्री० ॥ ४० ॥ स्थावरं जंगमं चैव अ
चरं चरमेषच ॥ येनव्याप्तं जगत्सर्वं तस्मै श्री० ॥ ४१ ॥ ज्ञानशक्तिसमारूढं त
त्वमालाविभूषितं ॥ भुक्तिमुक्तिप्रदातारं तस्मै श्री० ॥ ४२ ॥ अनेकजन्मसंप्राप्तिः
कर्मबंधविघातिने ॥ स्वात्मज्ञानप्रभावेन तस्मै श्री० ॥ ४३ ॥ शोषणं पापपंकस्य
दीपनं ज्ञानचक्षुषं ॥ गुरोपादोदकं सम्यक् तस्मै श्री० ॥ ४४ ॥ न गुरोरधिकं त

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

त्वंन गुरोरधिकंत पः ॥ तत्वज्ञानात्परं नास्ति तस्मै श्री० ॥ ४५ ॥ मंनाथः श्रीज
गंनाथ मद्गुरुः श्रीजगद्गुरुः ॥ ममत्मा सर्व भूतात्मा तस्मै श्री० ॥ ४६ ॥ गुरुरादि
रनादिश्च गुरुः परमदैवतं ॥ गुरोःपरतरं नास्ति तस्मै श्री० ॥ ४७ ॥ ध्यान मूलं
गुरोर्मूर्तिः पूजामूलं गुरोः पदं ॥ मंत्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ ४८ ॥
सप्तसागरपर्यंतं तीर्थस्नानफलं सदा ॥ गुरुरंघ्रिजलं बिंदु तत्कोट्यांशेन दु
र्लभं ॥ ४९ ॥ गुरुरेव जगत्सर्वं ब्रम्हाविष्णुशिवात्मकं ॥ गुरोः परतरं नास्ति
तस्मात्संपूज्यते गुरुं ॥ ५० ॥ ज्ञानं विनानैव मुक्तिस्तज्ज्ञानं गुरुभक्तितः ॥ गुरोः
समानतो नान्यत्साधयेद्गुरुमार्गिणः ॥ ५१ ॥ तस्मात्परतरं नास्ति नेतिनेतीति
वै श्रुतिः ॥ मनसा वचसा चैव सदा माराधयेद्गुरुं ॥ ५२ ॥ गुरुकृपाप्रसादेन ब्र



Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

म्हाविष्णुर्वै शिवात्मकं ॥ सामर्थ्यं तत्प्रसादेन केवलं गुरुसेनया ॥ ५३ ॥ देवदान
वगंधर्वा पितरो यक्षकिंन्नरा ॥ मुनियोपि न जानंति गुरुशुश्रूषणे विधिं ॥ ५४ ॥ महा
हंकारगर्वेण विद्यातपबलान्विता ॥ संसारकुहरावर्ते घटेयंत्र घटोयथा ॥ ५५ ॥ न
मुक्ता देवगंधर्वाः पितरो यक्षचारणः ॥ ऋषयः सर्वसिध्दाश्च गुरुसेवापराङ्-मुखा ॥ ५६ ॥
ध्यानं शृणु महादेवि सर्वानंदप्रदायकं ॥ सर्वसौख्यकरं चैव भुक्तिमुक्तिप्रदायकं ॥ ५७ ॥
श्रीमत्परंब्रम्ह गुरुं वदामि श्रीमत्परंब्रम्ह गुरुं भजामि ॥ श्रीमत्परंब्रम्ह गुरुं स्मरामि ॥
श्रीमत्परंब्रम्ह गुरुं नमामि ॥ ५८ ॥ ब्रम्हानंदं परमसुखदं केवलं ज्ञानमूर्तिं द्वंद्वातीतं
गगनसदृशं तत्वमस्यादिलक्ष्यं ॥ येकं नित्यं विमलमचलं सर्वधीसाक्षभूतं ॥
भावातीतं त्रिगुणरहितं सद्गुरुं तन्नमामि ॥ ५९ ॥ नित्यं शुध्दं निराभासं निराका

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7)

॥गुरु॥ रंनिरंजनं ॥नित्यंबोधचिदानंदं गुरुब्रम्हनमाम्यहं ॥६०॥ हृदंबुजेकर्णिकमध्यसं ॥गीता॥
स्थं। सिंहासनेसंस्थित दिव्यमूर्ति ॥ध्यायेद्गुरुंचंद्रशिलाप्रकाशं॥सच्चित्सुखा
॥६॥ भिष्टवरंददानं॥६१॥श्वेतांबरंश्वेतविलेपपुष्पं मुक्ताविभूषितं मुदितंद्विनेत्रं
॥वामांकपीठस्थितदिव्यशक्तिं मंदस्मितंसांद्रकृपानिधानं॥६२॥आनंदमानं
दकरंप्रसन्नंज्ञानस्वरूपंनिजबोधयुक्तं॥योगींद्रमीड्यंभवरोगवैद्यं श्रीमद्गुरुं
नित्यमहंनमामि॥६३॥यस्मिन्सृष्टिस्थितिध्वंसविधानानुग्रहात्मकं॥कृ
त्यंपंचविधिंशश्वद्भासतेतंगुरुंनमः॥६४॥प्रातःशिरसिशुक्लाब्जेद्विनेत्रंद्वि
भुजंगुरुं॥वराभयकरंशांतंस्मरेत्तन्नामपूर्वकं॥६५॥नगुरोरधिकंनगुरोरधिकं ॥६॥
नगुरोरधिकंनगुरोरधिकः॥शिवशासनतःशिवशासनतःशिवशासनतः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

शिवशासनतः ॥ ६६ ॥ इदमेव शिवं इदमेव शिवं इदमेव शिवं इदमेव शिवः ॥ म
मशासनतो ममशासनतो ममशासनतो ममशासनतः ॥ ६७ ॥ एवंविधिगुरुंध्या
त्वाज्ञानमुत्पद्यते शिवं ॥ तदा गुरूपदेशेन मुक्तोहमितिभावयेत् ॥ ६८ ॥ गुरुणाद
र्शिते मार्गेमनः शुद्धीचकारयेत् ॥ अनित्यखंडयेत्सर्वं यत्किंचिदात्मगोचरं ॥
६९ ॥ ज्ञेयः सर्वमतीतंचज्ञानंचमनउच्यते ॥ ज्ञानंज्ञेयंसमंकृत्वा पंथानान्यो
द्वितीयकः ॥ ७० ॥ एवं श्रुत्वा महादेवि गुरुनिंदां करोतियः ॥ सयातिनरका
न्घोरान् यावच्चंद्रदिवाकरौ ॥ ७१ ॥ यावद्देहांतकल्पोस्तितावद्देवगुरुंस्म
रेत् ॥ गुरुलोपोनकर्तव्यः स्वच्छंदोयदिवाभवेत् ॥ ७२ ॥ हुंकारेणनकर्तव्यं प्रा
ज्ञैः शिष्यैः कदाचन ॥ गुरुरग्रेनवक्तव्यं समस्तंचकदाचन ॥ ७३ ॥ योवैहुंकृ

(४)

॥गुरु॥ त्यतुहुंकृत्यंगुरुंनिर्जित्यवादतः॥अरण्येनिर्जलेदेशेसंभवेत्ब्रम्हराक्षसः॥७४॥ ॥गीता॥
॥७॥ मुनिभिःपन्नगैर्वापिसुरैर्वाशापितोयदि॥कालमृत्युभयाद्वापिगुरुरक्षतिपा
र्वति॥७५॥अशक्ताहिसुराद्याश्च ह्यशक्त्याःमुनयःस्तथा॥गुरुशापसमुत्पन्न
रक्षणायनशक्यते॥७६॥मंत्रराजमिदंदेविगुरुरित्यक्षरद्वयं॥स्मृतिवेदांतवा
क्यानांगुरुःसाक्षात्परंपदं॥७७॥श्रुतिस्मृतिमविज्ञायकेवलंगुरुशेवया॥
तेवैसंन्याशिनःप्रोक्ताइतरेवेषधारिणः॥७८॥नित्यंब्रम्हनिराकारंनिर्गु
णंबोधइत्परं॥पूर्णब्रम्हनिराभासंदीपोदीपांतरस्तथा॥७९॥गुरुकृपाप्र
सादेनआत्मारामंनिरक्षयेत्॥अनेनगुरुमार्गेणस्वात्मज्ञानंप्रवर्तते॥८०॥ ॥७॥
आब्रम्हस्तंबपर्यंतंपरमात्मस्वरूपकं॥स्थावरंजंगमंचैवप्रणमामिजग

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

न्मयं ॥८१॥ वंदेहंसच्चिदानंदं भेदातीतंजगद्गुरुं ॥ नित्यंपूर्णंनिराकारंनित्यमा
नंदकारकं ॥८२॥ परात्परतरंध्येयंनित्यमानंदकारकं ॥ हृदयाकाशमध्यस्थंशु
द्धस्फटिकसन्निभं ॥८३॥ स्फटिकःप्रतिमारूपंदृश्यतेदर्पणोयथा ॥ तथा
त्मानंचिदाकाशंआनंदंसोहमित्युत ॥८४॥ अंगुष्टमात्रपुरुषंध्यायतेच्चिन्म
यंहृदि ॥ तत्रस्फुरतिभावोयःशृणुतत्कथयाम्यहं ॥८५॥ अगोचरंतथागम्यनाम
रूपादिवर्जितं ॥ निःशब्दंतुविजानीयात्स्वभावोब्रम्हपार्वति ॥८६॥ यथानि
त्यंस्वभावेनकर्पूरंकुसुमादिकं ॥ शीतोष्णादिस्वभावेनयथाब्रम्हचशाश्व
तं ॥८७॥ स्वयंसर्वमयोभूत्वास्थातव्यंयत्रकुत्रचित् ॥ कीटभृंगीरिवध्या
नंयथाभवतितादृशं ॥८८॥ गुरुध्यानंतथानित्यंदेहीब्रम्हमयोभवेत् ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१)

॥ गुरु ॥ पिंडेपदेतथारूपे मुक्तास्तेनात्रसंशयः ॥ ८९ ॥ स्वयंसर्वमयोभूत्वापरतत्वंविलो ॥ गीता ॥
कयेत् ॥ परात्परपरंनान्यसर्वमेवनिरामयं ॥ ९० ॥ यस्यावलोकनंदेवि सर्वसंग
॥ ८ ॥ विवर्जितं ॥ एकाकीनिस्पृहःशांतःस्थातव्यंयत्रकुत्रचित् ॥ ९१ ॥ लब्ध्वावाथ
नलब्ध्वंवास्वल्पंवाबहुलंतथा ॥ निष्कामेनैवभोक्तव्यंसदासंतुष्टमानसः
॥ ९२ ॥ सर्वज्ञपदमित्याहुर्देहीब्रम्हमयोविदुः ॥ सदानंदोसदाशांतोरमतोयत्रकु
त्रचित् ॥ ९३ ॥ यत्रैवतिष्ठतेसोपितद्देशः पुण्यभाजनं ॥ मुक्तस्यलक्षणंदे
वि तवाग्रेकथितंमया ॥ ९४ ॥ उपदेशोमयादेवि गुरुमार्गेणदर्शितः ॥ गुरुभ
क्तिस्तथाध्यानंसकलंतवकीर्तितं ॥ ९५ ॥ अनेनतद्भवेत्कार्यंतद्वदामिम
हामते ॥ लोकोपकारकंदेवि लौकिकंतुनभावयेत् ॥ ९६ ॥ लौकिकंकर्म ॥ ८ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9A)

तोयांतिज्ञानहीनः परंतप ॥ ज्ञानीनां भावयेत्सर्वं कर्मनिष्कर्मसाम्यतां ॥ ९७॥
इदं तु भक्तिभावेन पठित्वा श्रुयतेयदि ॥ लिखित्वातत्प्रदातव्यं ॥ दानं दक्षिणया
सह ॥ ९८ ॥ गुरुगीतामिदं देवि शुद्धतत्वमयोदितं ॥ भवव्याधि विनाशा
य स्वयमेवजपेत्सदा ॥ ९९ ॥ गुरुगीताक्षरैकैकं मंत्रराजमिदंजपेत् ॥ अनेन
विविधामंत्राः कलानांईति षोडशी ॥ १०० ॥ अनंतफलमाप्नोति गुरु
गीतासदाजपेत् ॥ सर्वपापविनिर्मुक्तं सर्वदारिद्रनाशनं ॥ १ ॥ अकाल
मृत्युहरणं सर्वसंकटनाशनं ॥ यक्षराक्षसभुतानां चोरव्याघ्रभयापहं
॥ २ ॥ महाव्याधिगतासर्वे विभूतिः सिद्धिदाभवेत् ॥ अथवामोहनेवश्य
स्वयमेवजपेत्सदा ॥ ३ ॥ कुशैर्वादुर्वयादेवि आसनेशुभ्रकंबले ॥ उपविश्य

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10)

गुरु ॥ तन्नो देवि जपे देकाग्रमानसः ॥ ४ ॥ शुक्लाशनेव शांत्यर्थं वस्य रक्तासनं प्रिये ॥ अ ॥ गीता
॥ ९ ॥ भिचारे कृष्णवर्णं पीतं वर्णं तथागमे ॥ ५ ॥ उत्तरे शांतिजाप्यस्य वस्य पूर्वमुखोदितं ॥
दक्षिणे मारणं प्रोक्तं स्तंभने पश्चिमे मुखं ॥ ६ ॥ मोहनं सर्वभूतानां बंधमोक्षक
रं परं ॥ देवभूतप्रीयकरं राजाजनवशिप्रिये ॥ ७ ॥ मुखस्तंभकरं चैव सद्गुणानां वि
वर्धनं ॥ दुष्कर्मनाशनं चैव सत्कर्मसिद्धिदायकं ॥ ८ ॥ असाध्यं सिध्दये कार्यं नव
ग्रह भयापहं ॥ दुस्वप्ननाशनं चैव सुस्वप्न फलदायकं ॥ ९ ॥ सर्वशांतिकरं नित्यं वंध्या
पुत्र फलप्रदं ॥ अवैधव्यकरं स्त्रीणां सर्वसौभाग्यदायकं ॥ १० ॥ आयुरारोग्यमैश्वर्य
पुत्रपौत्रप्रवर्द्धनं ॥ अकामस्तु त्रिवारस्याज्जपेन्मोक्षमवाप्नुयात् ॥ ११ ॥ अवैधव्यस
कामेन लभते चान्यजन्मनी ॥ सर्वदुःखभयं विघ्नं नाशये त्तापहारकं ॥ १२ ॥ सर्वबाधा ॥ ९ ॥
प्रशमनं धर्मार्थकाममोक्षदं ॥ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं ॥ १३ ॥

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(ॻ)

कामीकस्यकामधेनुः कल्पितस्यफलंप्रदं ॥ चिंतामणिश्चिंतितस्य सर्वमंगलका
रकं ॥१४॥ लिखित्वाचप्रदातव्यं मोक्षश्रेयोमवाप्नुयात् ॥ कामेनजाप्यतेयोवैतस्य
कामंफलप्रदं ॥१५॥ जपेत्शाक्तसौरस्य गाणपत्यश्चवैष्णवः ॥ शैवे सर्वस्यसिद्धि
दं देविसत्यंसत्यंनसंशयः ॥१६॥ अथकाम्यजपःस्थानं ॥ कथयामिवरान
ने ॥ सागरेसरितेतीरे ॥ तीर्थेहरिहरालये ॥१७॥ शक्तिदेवालयेगोष्टेसर्वदे
वालयेशुभे ॥ वटस्यधात्रिमूलेवा मठेवृंदावनेस्तथा ॥१८॥ पवित्रेनिर्मले
स्थानेनित्यानुष्टानतोपिवा ॥ निर्वचनेनमौन्येनजपमेतत्समाचरेत् ॥१९॥ स्मशा
ने भयभूमौच वटमूलांतिकेनथा ॥ सिध्यंति धोलरे मूलेच्यूतवृक्षस्यसंन्निधौ
॥२०॥ गुरुपुत्रोवरोमूर्खेतस्य सिध्यंतिनान्यथा ॥ शुभकर्माणिसर्वाणिदीक्षा
दीक्षादिसिद्धिदा ॥२१॥ संसारमलनाशाय भवपाशनिवर्तकं ॥ गुरुगीतां

(11)

।। गुरु ।। भसिस्नानंतत्वज्ञः कुरुतेसदा ।।२२।। स एव गुरुवः साक्षात् सदाविद्ब्रम्हसत्तमः ।। ।। गीता
।।१०।। तस्यस्थानानिसर्वाणिपवित्राणिनसंशयः ।।२३।। सदेश शुध्द यत्रासौ स्व भावाद्यत्र
तिष्टति ।। तत्रेदेवगणास्सर्वे क्षेत्रे पीठेवसंतिहि ।।२४।। आसंस्थो शयनस्थोगछंस्तिष्ट ।। न ।। स्यु
तोपिवा ।। अश्वारूढो गजारूढो सुषुप्तो जाग्रतोपिवा ।।२५।। शुचिष्मंतः सदाज्ञानी
गुरुगीताजपेनतत् ।। तस्यदर्शनमात्रेणपुनर्जन्मन विद्यते ।।२६।। सागरंच यथा
तोयं क्षीरेक्षीरं यथाजलं ।। भिन्नेकुंभेयथाकाशंतथात्मापरमात्मनि ।।२७।। तथैवज्ञा
निजीवात्मा परब्रम्हणिलिप्यते ।। ऐक्येनरमतेज्ञानी यत्रयत्रदिवानिशी ।।२८।। येनवि
धिमहामुक्तोवर्ततेसर्वदास्वयं ।। तस्मात्सर्वप्रयत्नेन भावभक्तिः करोतियः ।।२९।। गुरु
संतोषिताः सर्वे मुक्तास्तेनात्रसंशयः ।। भुक्तिमुक्तिदयातेषांजिव्हाग्रेचसरस्वति ।।३०।। ।।१०।।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1 मि)

अनेनभुक्तिमार्गेण गुरुगीतासदाजपेत्॥सर्वसिद्धिमवाप्नोति भुक्तिमुक्तिनसंशयः॥
३१॥सत्यंसत्यपुनःसत्यंधर्मसांख्यमयोदितं॥गुरुगीतासमन्नास्ति सत्यंसत्यंवरान
ने॥३२॥येकदेवोयेकधर्मयेकनिष्टापरंतप॥गुरोःपरतरंनास्तिसत्यंसत्यंवराननें
॥३३॥माताधन्यःपिताधन्यो धन्योवंशकुलंतथा॥धन्याचवसुधादेवि गुरुभक्तिः
सुदुर्लभा॥३४॥शरिरमिंद्रियंप्राण अर्थस्वजनबांधवः॥मातापिताकुलंदेविगु
रुरेवनसंशयः॥३५॥अकल्पजन्मनाकोट्यां यज्ञव्रततपःक्रियः॥तत्सर्वंसुफला
देविगुरुसंतोषमात्रतः॥३६॥विद्याधनबलेनैव मंदभाग्यस्वयेजनः॥गुरुसेवा
नकुर्वंति अधोगच्छंतिपार्वति॥३७॥ब्रम्हाविष्णुमहेशाद्दिदेवर्षिपितृकिंन्न
राः॥सिध्दचारणयक्षाश्चऋषयोमुनयोजनाः॥३८॥गुरुभावपरंतीर्थमन्यतीर्थं
निरर्थकं॥सर्वतीर्थंचयोदेविय द्गुरोचरणांबुजे॥३९॥इदंरहस्यनोवाच्यंतवाग्रे त

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12)

॥गुरु॥ कथितंमया ॥सुगोप्यंचप्रयत्नेनयेनात्मानःप्रयच्छति॥४०॥स्वामिमुख्य ॥गीता॥
गणेशादि वैष्णवादिषुपार्वति॥मनसापिनवक्तव्यं ममसंन्निधकारकं॥४१॥
॥२२॥ अतीवचिलपक्कस्यश्रध्याभक्तिसमन्वितः॥वक्तव्यंनुमिदं देविममात्मा
नंसदाप्रिये॥४२॥अभक्तेवंचके धूर्ते पाषांडेनास्तिकेपरे॥मनसापिन
वक्तव्यं गुरुगीताकदाचन॥४३॥गुरवोबहवःसंतिशिष्यवित्तापहारकाः
॥सद्गुरुदुर्लभंयांति शिष्यसंतापहारकः॥४४॥संसारसागरसमुध्धर
णैकमंत्रं॥ब्रम्हादिदेवमुनिपूजितशिध्धमंत्रं॥दारिद्र्यदुःखभयशोक
विनाशमंत्रं॥वंदेमहाभयहरं गुरुराजमंत्रं॥१४५॥ ६ ॥ ६॥
इतीश्रीस्कंदपुराणेउमामहेश्वरसंवादे गुरुगीतास्तोत्रंसंपूर्णं॥श्री ॥११॥
गुरुदत्तात्रयार्पणमस्तु॥ शुभं भवतु॥ ६ ॥ ६ ॥ ६

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12A)

इदं पुस्तकं हर्षे इत्युपनामकं रामचंद्रस्य पुत्रः वामनेन लिख्यते ।।
शुभं भवतु ।। शके १८०६ तारणनामसंवत्सरे माघमासे कृष्णपक्षे
त्रयोदश्यां तिथौ तद्दिने समाप्तः ।। श्रीकृष्णार्पणमस्तु ।। ६ ।। ६ ।।

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(13)

इतिश्री गुरुगीता संपूर्णमस्तु

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥१२॥

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com